**Gaekwad's Oriental Series**
Published under the Authority of the Maharaja Sayajirao University of Baroda.

General Editor:
**B. J. Sandesara,**
M.A., Ph.D.

No. 148

कविसार्वभौममहोपाध्यायश्रीहरिहरविरचितः

# शङ्खपराभवव्यायोगः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# ŚAṄKHA - PARĀBHAVA - VYĀYOGA

A Historical Sanskrit Play by Harihara

Edited by
**Bhogilal Jayachandbhai Sandesara**
Director, Oriental Institute,
Professor and Head of the Department of Gujarati,
M. S. University of Baroda

**ORIENTAL INSTITUTE**
**BARODA**
**1965**

P. P. Ac. Gunratnasuri M.S.
Jin Gun Aaradhak Trust

First Edition
Copies 500
1965

Published with the financial aid of the University Grants Commission and the Government of the Gujarat State.

Printed by Ramanlal J. Patel, Manager, The Maharaja Sayajirao University of Baroda Press (Sadhana Press), Near Palace Gate, Palace Road, Baroda and published on behalf of the Maharaja Sayajirao University of Baroda by Dr. Bhogilal J. Sandesara, Director, Oriental Institute, Baroda, December 1965.

**Price Rs. 4=00**

*Copies of this work can be had from :—*

***Manager :***

THE UNIVERSITY PUBLICATIONS SALES UNIT

Near Palace Gate, Palace Road, Baroda.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

## CONTENTS


| | Pages |
|---|---|
| Introduction .. .. .. .. .. .. | i-viii |
| Text of Śaṅkha-parābhava-vyāyoga .. .. .. .. | 1-23 |
| Padya-sūcī .. .. .. .. .. .. | 25-26 |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# INTRODUCTION

Harihara was one of the prominent poets in the literary circle of the great minister Vastupāla, the famous patron of literature and art, who flourished in Gujarāt in the first half of the thirteenth century A. D. Rājaśekharasūri, in his Prabandhakośa (1349 A. D.), has devoted one whole Prabandha to Harihara, and we know from many contemporary references that the poetry of Harihara was held in high esteem. According to the Prabandhakośa,[1] Harihara was a descendent of Śrīharṣa, the celebrated author of the Naiṣadhīyacarita (circa 1174 A. D.), one of the most formidable poetic compositions in Sanskrit literature. It was Harihara who had brought the first manuscript of the Naiṣadhīyacarita to Gujarāt when he came from his native place in the Gauḍa country to the court of king Vīradhavala at Dhoḷkā,[2] and it was at the initiative of Vastupāla, the chief minister of Vīradhavala, that the work got a wide currency in the province, as the result of which the oldest commentaries on the work, like the Sāhityavidyādharī of Vidyādhara[3] (second half of the 13th century A. D.) and the commentary by Caṇḍu Paṇḍita[4] (1297 A.D.) were written in Gujarāt.

---

[1] Prabandhakośa (Singhi Series), pp. 58 ff.

[2] Dr. A. N. Jani has recently shown in a Gujarātī article (Jaina Yuga, April, 1959) that the Naiṣadhīyacarita was known in Gujarāt before Harihara came to Dhoḷkā, as it has been quoted in Mahendrasūri's commentary on the Anekārthakośa of the great Jaina savant Hemacandra. Mahendrasūri was a pupil of Hemacandra and the said commentary was composed shortly after the latter's death in 1173 A.D. and these quotations are, no doubt, the earliest literary references to the Naiṣadhīyacarita. However, Rājaśekhara's account is substantial in the sense that the Naiṣadhīyacarita got a wide currency in the learned public of Gujarāt after Harihara's visit, and numerous commentaries on that poem were composed as a result of assiduous study.

[3] Vidyādhara had written his commentary on the text of the Naiṣadhīyacarita as it was found in the *Bhāratībhāṇḍāgāra* or royal library of king Vīsaladeva, the son of Vīradhavala. It appears that this commentary was popular among students, and a large number of its manuscripts are available in Gujarāt and Rājasthān.

[4] Caṇḍu Paṇḍita was a Nāgara Brahmin of Dhoḷkā and a great vedic scholar. As mentioned in the commentary, he performed several Vedic sacrifices like Dvādaśāha and Agnicayana, and by performing the Vājapeya and Bṛhaspatisava sacrifices he acquired the titles of Samrāṭ and Sthapati, respectively. We are also told that he performed a number of Somasatras. Caṇḍu is the only

P. P. Ac. Gunratnasuri M.S.  Jin Gun Aaradhak Trust

The Prabandhakośa describes how Harihara came to Gujarāt, how he was received by the king Vīradhavala and his minister, Vastupāla at Dhoḷkā, how Someśvara, the hereditary priest of the Caulukya kings of Gujarāt and a remarkable poet himself, did not like Harihara's presence at first, but how they became friends later on at the intervention of Vastupāla. [5] Someśvara in the first canto of his historical poem Kīrtikaumudī, has described Harihara as कवीनां पाकशासन: [6], and according to the Prabandhakośa, in a Subhāṣita, described Harihara's poetry as superior to nectar [7]. In the last canto of his Surathotsava Mahākāvya, Someśvara has described Harihara and Subhaṭa, the author of the Dūtāṅgada Chāyānāṭaka, as कविप्रवर [8]. The Prabandhakośa mentions him as सिद्धसारस्वत. A number of verses ascribed to Harihara are quoted in the Prabandhakośa ( pp. 58, 61 ) and Vastupālacarita of Jinaharṣa ( VI. 79-80 ) [9]. All this shows that Harihara was a distinguished poet.

Some years ago I had occasion to observe in my book, *Literary Circle of Mahāmātya Vastupāla and its Contribution to Sanskrit Literature* ( Bhāratīya Vidyā Bhavan, Bombay, 1953 ) that " If Harihara wrote any works they have not been discovered ( p. 55 ). " I am now happily in a position to announce that recently a complete literary work, *viz.*, the Śaṅkhaparābhava Vyāyoga by Harihara, has been discovered by my teacher, Muni Śrī Puṇyavijayajī from Devaśā Pāḍā Jñāna Bhāṇḍāra at Ahmedabad.

---

commentator of Sanskrit poems, who quotes from the Śrauta Sūtras. A fragmentary manuscript of the commentary by Caṇḍu Paṇḍita is preserved in the Bombay Government Collection at the Bhandarkar Institute, Poona, from which Prof. Handiqui has given extracts in his English translation of the Naiṣadhīyacarita. Another manuscript of the commentary, which too is in an incomplete form, was recently acquired by the Gujarati Department of the M. S. University of Baroda.

5 The Purātanaprabandhasaṅgraha ( p. 77 ) gives interesting description of Harihara's rivalry with a poet called Madana, who also was a member of the literary circle of the minister Vastupāla.

6 स्ववाक्पाकेन यो वाचां पाकं शास्त्यपरान् कवीन् ।
कथं हरिहर: सोऽभूत् कवीनां पाकशासन: ॥

( Kīrtikaumudī, I. 25 )

7 मुधा मधु मुधा सीधु मुधा कोऽपि सुधारस: ।
आस्वादितं मनोहारि यदि हारिहरं वच: ॥

( Prabandhakośa, p. 58 )

8 Surathotsava Mahākāvya, XV. 44.

9 The Sūktimuktāvali of Jahlaṇa and Śārṅgadharapaddhati of Śārṅgadhara quote a number of verses in the name of Harihara, but we are not sure whether they are the compositions of our Harihara or of some other poet of that name.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The Śaṅkhaparābhava is a historical play in one act in the literary form known as Vyāyoga [10]. Literally it means ' defeat of Śaṅkha, ' and it describes the battle between Śaṅkha, the son of Sindhurāja, the ruler of Lāṭa, on one hand and Vastupāla on the other. Saṅkha attacked the port of Stambhatīrtha or Cambay where Vastupāla was Governor, claiming that it was a possession of the king of Lāṭa, since it was annexed by Vīradhavala when Śaṅkha was busy fighting against the Yādava king Siṁhaṇa of Devagiri. A fierce battle was fought at a place called Vaṭakūpa or Vaḍavā near Cambay with heavy casualty on both sides, but in the end Śaṅkha was defeated and was forced to make a hasty retreat to Broach, the capital of Lāṭa. It appears from the prologue of the play that it was acted at the order of Vastupāla to commemorate this victory.

I propose to give here a brief analysis of this play, adding my remarks wherever necessary.

Immediately after the Nāndī, the Sthāpaka enters, announces that it is the season of summer and recites a stanza. He rejoices to see festivities in progress among the people, and calls his wife. Naṭī, then, comes on the stage, wants to know her husband's commands, but is answered by the Sūtradhāra. Apparently the two terms, Sthāpaka and Sūtradhāra, are considered synonymous by the author of the play and also perhaps by the later dramatic traditon in Sanskrit. In the prologue of the Pārthaparākrama ( G.O.S., No. 4 ), another Vyāyoga composed and acted in Gujarāt about 1170 A.D., these two terms are in the same way used synonymously.

We further know from the prologue that Vasantapāla ( that was the poetic name of Vastupāla ) had defeated Śaṅkha, and Sūtradhāra had got in his hand a manuscript of the Vyāyoga describing this event. Then a verse describes the poetic qualities and scholarship of Harihara—

एकेनैव दिनेन यः कवयितुं शक्तः प्रबन्धेषु य-
द्वाचः कर्कशतर्कशाणनिशिताश्छिन्दन्ति वैतण्डिकान् ।
येनानेकनरेन्द्रवन्दितपदद्वन्द्वेन बन्दीकृता
विद्वांसः सुकृतैकभाजनमसावस्मिन् प्रबन्धे कविः ॥ ६ ॥

Naṭī, thereupon, can infer very easily that such a poet can be none other than Harihara.

Sūtradhāra, then, by way of further introduction of the poet Harihara

[10] Another historical play composed by a poet of the literary circle of Vastupāla is the Hammīramadamardana ( G. O. S., no. 10 ) of Jayasiṁhasūri, dramatizing Vastupāla 's strategy in repulsing a Muslim attack on Gujarāt. It was acted at Cambay at the instance of Jaitrasiṁha or Jayantasiṁha, son of Vastupāla and the then governor of the city.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

informs us that he belonged to the Gauḍa country and Bhāradvāja Gotra and that he was on his pilgrimage to the shrine of Someśvara or Somanātha—[11]

गौडचूडामणेरस्य भारद्वाजद्विजन्मनः ।
पवित्रयति नाभैव दूरे चारित्रचातुरी ॥ ७ ॥

तदलमतिविस्तरेण, प्रस्तुतमनुसरामः । यदयमनेन महाकविना श्रीसोमेश्वरयात्राप्रसङ्गसङ्गतेन सूरिसूरशिरोमणे-र्महाराजश्रीवीरधवलसचिवशेखरस्य वसन्तपालस्य गुणानुरागवशंवदहृदयेन निर्माय समर्पितोऽयं प्रबन्धः साम्प्रतम-भिनेष्यते ।

At this point the sound of war-trumpets is heard from behind the curtain, and the Sūtradhāra knows it to be a sign that his company of actors is ready for performance of this heroic play.

At the end of the prologue enters Bandirāja or chief of the bards and his party of Māgadhas or minstrels in the service of Vastupāla. We gather from their talk that having come to know of Śaṅkha's proposed attack on Cambay from his spies, Vastupāla had deputed them to challenge the enemy. The chief of the bards utters a verse describing the valour of Vastupāla—

प्राप्ते प्रत्यर्थिनां सैन्ये दैन्ये यः पुनरर्थिनाम् ।
असूनां च वसूनां च न धत्ते गणनामपि ॥ १० ॥

Meanwhile other bards declare that Śaṅkha has arrived with his retinue. The chief of the bards greets him, describes his heroic bearing and extols in two verses the valour of Vīradhavala and Vastupāla.

Again a big noise is heard from behind the curtain. All pay attention, and the voice of Śaṅkha is heard. Like a true warrior of his times, he speaks lightly of the strength of his enemies and tells the bards to convey his rejoinder to Vastupāla. The bards and their chief give a reply to Saṅkha and think of going to their master to make a report. On the way, the chief of the bards describes the battlefield—

तूणादाकृष्य बाणानथ धनुषि समारोप्य नीत्वा च कर्ण-
प्रान्तं यावत् क्षिपन्तः समरभुवि रुषा पत्तयः सञ्चरन्ति ।
अन्योन्यं चाऽऽहतानामरुषि परुषितैर्मार्गणैर्लक्ष्यपुङ्खै-
रेषां रेखाऽपि नीलोत्पलवलयमयी लक्ष्यते मूर्च्छितानाम् ॥ २० ॥

The Bandirāja says that battle has started, and he and other bards describe the fray in verse and ornate prose, the chief of the bards speaking in Sanskrit and other bards in Prākrit. As the major part of the play is filled up with the events on the battlefield, which cannot be shown on the stage according to Sanskrit dramatic tradition, the characters of the bards are utilized to describe and to report the happenings there. We further know from them that

---

[11] The Prabandhakośa also describes Harihara's pilgrimage to Somanātha and quotes two verses that Harihara uttered while paying his homage to the God.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

Śaṅkha and his brother Surapāla are attempting to enter and sack the city of Cambay; and Bhuvanapāla, 'the ornament of Gaula (Guj. गोला) family', leads the army of Vastupāla against the enemies. They can see nothing on the battle-field, because the atmosphere is full of dust on account of the great clash of the contending armies. The bards recite a few verses in praise of Vīradhavala, Vastupāla, his brother Tejapāla, and son Jaitrasiṁha.

Again, a terrible noise is heard from behind the curtain. The bards think that either Śaṅkha is killed by Bhuvanapāla or vice versa. Later on, we know that it was the death of Bhuvanapāla, and not of Śaṅkha. They also report that chief warriors on the side of Śaṅkha—Kalhaṇa and Vaijala are killed and Śaṅkha's brother Surapāla is fatally wounded and that he is taken away by bards from the battlefield.[12]

Now, from behind the curtain one hears the spirited dialogue between Bhuvanapāla and Śaṅkha, and presently their terrible fight is reported. But Bhuvanapāla is dead, though only after killing many on the enemy side. Again, one hears the voice of a messenger who brings to Vastupāla the severed hand of Bhuvanapāla, sent as a present by Śaṅkha. Vastupāla is greatly moved at the death of his devoted vassal and he removes his head-dress as a token of mourning.[13] The chief of the bards reports that Vastupāla, now fully roused, looks almost a different person, as he goes to fight with Śaṅkha. After the description of a brief fight it is reported that Śaṅkha or Saṅgrāmasiṁha, unable to make a stand against Vastupāla, ran away from the field—

येन संग्रामसिंहोऽयं त्रासावेशपलायितः ।
हन्त संग्रामगोमायुपदवीमध्यरोप्यत ॥ ६२ ॥

At this point a verse, addressed to Śaṅkha, but referring to Vīradhavala's previous victory over the Yādava king Siṁhaṇa of Devagiri is heard—

आयातोऽसि किमर्थमाहवसुखश्रद्धालुना चेतसा
न ज्ञातो भविता स वीरधवलस्योच्चैः प्रतापानलः ।
यस्मिन् विस्मयनीयपौरुषरसाक्रान्तक्ष्मामण्डलो-
ऽप्याशङ्कापिशुनं न मुञ्चति मनः श्रीसिंहणक्ष्मापतिः ॥ ६४ ॥

---

[12] Jinaharṣa in his Vastupālacarita (V. 212-223) gives a list of warriors that fell in this battle on both the sides. Vasantavilāsa (V. 95), poetical biography of Vastupāla by contemporary Bālacandra, mentions that nine mighty warriors including Vīrama on Vastupāla's side were killed by the brothers of Śaṅkha.

[13] The Prabandhacintāmaṇi (Singhi Series, p. 102) mentions that Vastupāla built a temple of Śiva called Bhuvanapāleśvara on the spot where Bhuvanapāla fell. The Purātanaprabandhasaṅgraha (p. 56) also mentions this.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

The chief of the bards comes forward and amidst the festivities of victory he meets 'the author of Śaṅkhaparābhava', *viz.* Vastupāla, hero of the play, and recites a few poetic verses praising him and also describing the joy of the citizens. Vastupāla feels abashed. He says that, in fact, king Vīradhavala, his master, should be praised and recites a few verses describing his master's valour.[14] The chief of the bards requests Vastupāla to witness the festivities in the city and other bards describe them in ornate Prākrit. The chief of the bards says that the people flock to the shrine of the goddess Ekallavīrā to take part in the thanksgiving ceremony[15] and that he would like to reach the place before it becomes too crowded.

Then enters Śreṣṭhika (नगरश्रेष्ठिक, Guj. नगरशेठ, first citizen) and other people. They describe in a number of beautiful verses the dancing and other festivities going on in the city. The whole procession slowly goes on and arrives at the shrine of the goddess. The Brahmins there pronounce their Benediction upon the king Vīradhavala, his queen and ministers—

सार्धं जैतल्लदेव्या सकलमपि कलाकोशमुल्लासयन्त्या
राज्यं निष्कण्टकोर्वीभरमुपनतया वस्तुपालेन साकम् ।
तेजःपालेन च श्रीकरणपरिणतप्रातिभेनानुयातो
धत्तां श्रीवीरशक्रः क्षितिवलयमयं यावदम्भोजभानुः ॥ ७६ ॥

And all perform the pūjā ceremony, and pray to the goddess—

यथाधुना देवि कृतप्रसादा श्रीवस्तुपालस्य जयोत्सवेन ।
तथा तथाऽऽपत्सु पुनः पुनर्नस्त्रातुं कृपामर्हसि कर्तुमार्ये ॥ ७९ ॥

A voice is heard from the sky. That is the voice of the goddess. She is pleased with the worship and is willing to fulfil the desires of the citizens. The Sreṣṭhika, on behalf of the citizens, makes the following request to the goddess[16]—

राजानः सत्कवीनाममृतमिव वचोमञ्जरीमाद्रियन्तां
सन्तापः पापकर्णेजपकपटकृतो माऽस्तु विद्वज्जनस्य ।

---

[14] It may be noted here that Vastupāla is credited with the faculty of extempore poetic compositions, and several verses ascribed to him are found in various Prabandhas and different anthologies; vide *Literary Circle of Mahāmātya Vastupāla, pp. 40-41.*

[15] The Kīrtikaumudī (ch. V) also describes that there was a festival in the shrine of the goddess Ekallavīrā, that Vastupāla went there to salute the goddess, and that the men and women flocked on the road to have a glance at the victorious hero.

[16] Just as in the Pārthaparākrama Vyāyoga, the final Bharatavākya is allotted not to Arjuna, the hero of the play, but to Vāsava, who appears at the close of the play, here also it is allotted not to Vastupāla, the hero, but to the Śreṣṭhika.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आचन्द्रार्कं क्रियन्तां हरिहरसुकवेः सूक्तिसीमन्तिनीभिः
साकूतं लास्यलीलाः सहृदयहृदयोत्तुङ्गरङ्गस्थलीषु ॥ ८१ ॥

Again the voice of the goddess is heard from the sky, saying एवमस्तु ; and all make their exit.

This brief analysis of the Śaṅkhaparābhava will show its peculiar importance. It is a play based on a contemporary historical event, one of the very few such plays in Sanskrit literature. The event took place in Gujarāt, while the poet who wrote the play came from the Gauḍa land. Apart from the fact that the historical information available from the play is corroborated by other contemporary and later evidence, this Vyāyoga is a notable piece of mediaeval Sanskrit literature, and its ornate prose and verse bear ample testimony to the literary skill of its author. It is also noteworthy, because it is the only available—and that, too, recently discovered—work from the pen of a literary celebrity like Harihara, about whom we know so much from Prabandhas and other sources of history of Gujarāt. From all these points of view the Śaṅkhaparābhava deserved to be critically edited and published.

## MANUSCRIPT

The present edition of the Śaṅkhaparābhava Vyāyoga is based on the only available manuscript, the details of which are as follows :—

Manuscript no. 2544 in Pt. Harṣavimalajī Jaina Jñāna Bhāṇḍāra, Devaśāno Pāḍo, Ahmedabad.

Material—Paper

Folios—29 ( folios 1-21 contain the Hammīramadamardana Nāṭaka of Jayasiṁhasūri, while folios 21-29 contain the Saṅkhaparābhava Vyāyoga. )

Size— 16¼″ × 4½″

Script—Devanāgarī

No. of lines on each folio—13

No. of letters in each line—55 to 60

Condition—Good

Date of copying—Not mentioned, but from the script the manuscript appears to have been copied down not later than the 16th century A.D.

Place of copying—Not mentioned.

The manuscript is, on the whole, free from mistakes. However, a few corrections in readings are made in brackets.

P. P. Ac. Gunratnasuri M.S.                Jin Gun Aaradhak Trust

## ACKNOWLEDGEMENT

All scholars of classical Sanskrit literature should feel grateful to Āgamaprabhākara Muni Śrī Puṇyavijayajī for discovering the MS of the Saṅkhaparābhava Vyāyoga of Harihara, who is very highly spoken of by contemporary poets and scholars. Muniji was good enough to put at my disposal a photo-copy and a transcript of the manuscript and allow me to use the same for the purpose of this editing. We are thankful to the Jaina monks of the Vimala Gaccha who are custodians of Pt. Harṣavimalajī Jaina Jñāna Bhāṇḍāra at Devaśāno Pāḍo, Ahmedabad, and also to the trustees of the said Jñāna Bhāṇdāra for extending the loan of the manuscript. I am indebted to Mr. Amritlal Mohanlal Pandit, Research Officer, Prakrit Text Society and to Mr. J. S. Pade, Research Officer, Oriental Institute, for some useful suggestions and also for assistance in reading the proofs. I thank Mr. P. H. Joshi, Research Assistant, Oriental Institute, for preparing an Index of verses.

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust



First folio ( 21 b ) of the MS of the Saṅkhaparābhava Vyāyoga.

P. P. Ac. Gunratnasuri M.S.
Jin Gun Aaradhak Trust



Last folio ( 29 a ) of the MS of the Saṅkhaparābhava Vyāyoga.

कविसार्वभौममहोपाध्यायश्रीहरिहरविरचितः

# शङ्खपराभवव्यायोगः ।

॥ ॐ नमः सर्वज्ञाय ॥

कर्त्तेति कीर्त्तिमन्य[स्य] स्वयं कुर्वन् करोति यः ।
तस्मै महाशयशिरोमणये **स्थाणवे** नमः ॥ १ ॥

जीयाद**म्बुजिनीपतिः** स भगवानाख्यां मनस्तापहृद्,
देवः **कैरविणीदयालु**रवताद् विश्वानि **वैश्वानरः** ।
एतैर्दक्षिणवामभालनयनैस्त्रैलोक्यमालोकय-
न्नानन्दामृतमातनोतु कृतिनां **कात्यायनीवल्लभः** ॥ २ ॥

( नान्द्यन्ते )

**स्थापकः**—( परितोऽवलोक्य ) अयमयममन्दकन्दलितानन्दमकरन्दमाद्यदिन्दिन्दिरमेदुरक(झ)ङ्कारमुखरमल्लीवनः पचेलिमरसालफलपरिमलोद्गारगृहयालुकोकिलकुहूडम्बरः परिणमति व्यवसायिनां व्यवसायैः समं समन्ततो निदाघसमयः । अयमेव च प्रावृषां पूर्वरङ्गः । तथाहि—

मदयति गगनश्रीर्द्वित्रपाथोदखण्डा
त्रिचतुरपथिकौघैः पादपाताच्च भूमिः ।
सरसि च परिशिष्टं पञ्चषैः पुण्डरीकै-
र्घनमजनि च पङ्कं मग्नसप्ताष्टकङ्कम् ॥ ३ ॥

( इति निरूप्य )

कथमयमभितः पौरेषु महोत्सव इव प्रवर्तते ? । तदाहूय गृहिणीं निरूपयामि ।

( नेपथ्याभिमुखम् )

आर्ये ! इत इतः ।

( प्रविश्य )

**नटी**—[1]इय म्हि, आणवेदु अज्जो ।

**सूत्रधारः**—आर्ये ! किमेतत् ?—

---

१. इयमस्मि, आज्ञापयतु आर्यः ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

द्वारं तोरणमालिकातरलितं, तद्भित्तयश्चित्रिताः,
सम्मूर्छन्त्यजिरेषु शालिदलने ग्रामभ्रुवां गीतयः ।
धूमैराज्यविपाकसौरभशुभैः प्रत्यालयं दीप्यते,
तत् किं नाम महोत्सवोऽयमभितो येनैष शङ्खध्वनिः ॥ ४ ॥

**नटी**—[1]भाव ! कुदो अज्ज वि संखज्झुणी ? ।

**नटः**—प्रिये ! केनायं **सिन्धुराज**सम्भवस्यापि **शङ्ख**स्य सर्वजनसिद्धो ध्वनिरपह्नूयते ? ।

**नटी**—[2]अज्ज ! ण मए अवण्हविज्जदि, अवण्हुदो खु **सिंधुराय**संभवस्स **संखस्स** सद्दो **आसरायणंदणेण मल्लएवाणुएण तेअवाल**जेट्ठभादुणा महारायसिरि**वीरधवल**सचिवसेहरेण **वसंतवालेण** ।

**सूत्रधारः**—( सलज्जमात्मगतम् ) अये ! दूरं भ्रमितोऽस्मि, यदहं करकलित**शङ्खपराभवव्यायोग**पुस्तक एव **शङ्ख**पराभववृत्तान्तं पृच्छामि । तत् कक्षानिक्षिप्तबालक एव बालकमन्विष्यामि वाटके । ( प्रकाशम् ) आर्ये !

भ्राता **सिंह**भटस्य यः किल भटश्रेणीशिरोमण्डली-
माणिक्यप्रतिबिम्बितांह्रियुगलः श्री**सिन्धुराजो**ऽभवत् ।
शङ्खस्तत्तनयः पराक्रमकथारथ्यैकपान्थः कथं
वीरः सम्प्रति **वस्तुपाल**सचिवेनाऽऽजौ पराजीयते ? ॥ ५ ॥

**नटी**—[3]तं सो च्चेय सुहडसेहरो जाणेदि ।

**सूत्रधारः**—( सप्रहासम् ) यद्येवं तदहमपि सप्रबन्धमेव बुध्ये, यदयं करस्थ एव मे **शङ्खपराजयो नाम व्यायोगः** । ( इति दर्शयति । )

**नटी**—[4]जइ एवं ता किं हत्थे कंकणम्मि दप्पणो अण्णेसिओ ? । ( पुनः

---

१ भाव ! कुतः अद्यापि शङ्खध्वनिः ? ।

२ आर्य ! न मया अपह्नूयते, अपह्नुतः खलु सिन्धुराजसम्भवस्य शङ्खस्य शब्दः आसराजनन्दनेन मल्लदेवानुजेन तेजःपालज्येष्ठभ्रात्रा महाराजश्रीवीरधवलसचिवशेखरेण वसन्तपालेन ।

३ तत् स एव सुभटशेखरः जानाति ।

४ यदि एवं तत् किं हस्ते कङ्कणे दर्पणः अन्वेषितः ? । केन वा कविना एषः महाराजवीरधवलसचिवशेखरेण वसन्तपालेन सममेव निर्वाहितः शङ्खपराभवः ? ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सकौतुकम् ) केण वा कइणा एसो महारायवीरधवलसचिवसेहरेण **वसंतवालेण** समं य्येव निव्वाहिदो **संखपराहवो** ?।

**नटः**—प्रिये ! त्वमेवानुमानेनानुसन्धाय गृहाण, यः कविरस्येति ।

एकेनैव दिनेन यः कवयितुं शक्तः प्रबन्धेषु, य-
द्वाचः कर्कशतर्कशाणनिशिताश्छिन्दन्ति वैतण्डिकान् ।
येनानेकनरेन्द्रवन्दितपदद्वन्द्वेन बन्दीकृता
विद्वांसः, सुकृतैकभाजनमसावस्मिन् प्रबन्धे कविः ॥ ६ ॥

**नटी**—( विहस्य ) [1]अज्ज ! को एत्थ अणुमाणाणुसंधाणप्पयासो ?। जं असाहारणलक्खणेहिं तुम्हेहिं चेय साहियं **हरिहरु** त्ति णामक्खरग्गहणसुण्णेहिं । णवरं अप्पा वंचिदो ।

**नटः**—आर्ये ! सत्यमात्थ,

**गौडचूडामणेरस्य भारद्वाज**द्विजन्मनः ।
पवित्रयति नामैव, दूरे चारित्रचातुरी ॥ ७ ॥

तदलमतिविस्तरेण, प्रस्तुतमनुसरामः । यदयमनेन महाकविना श्री**सोमेश्वर-यात्रा**प्रसङ्गसङ्गतेन सूरिसूरशिरोमणेर्महाराजश्री**वीरधवल**सचिवशेखरस्य **वसन्तपाल**स्य गुणानुरागवशंवदहृदयेन निर्माय समर्पितोऽयं प्रबन्धः साम्प्रतमभिनेष्यते ।

**नटी**—[2]इत्थ को विलम्बो ?। अहिणयसज्जो य्येव अम्हाणं संपयाओ । ण वा को वि तहाखलजणो पवीरसेहरस्स विक्कमचमक्कारपच्चक्खीकदविक्कमाइच्चस्स महारायसिरि**वीरधवल**स्स सहाए, जो अंतराओ संभाविज्जदि ।

( नेपथ्ये )

भो भोः सेनानियोगिनः ! सज्जन्ताम्,

---

१ आर्य ! कः अत्र अनुमानानुसन्धानप्रयासः ? यद् असाधारणलक्षणैः युष्माभिः एव कथितं हरिहर इति नामाक्षरग्रहणशून्यैः, केवलं आत्मा वञ्चितः ॥

२ अत्र कः विलम्बः ? अभिनयसज्ज एव अस्माकं सम्प्रदायः । न वा कोऽपि तथाखलजनः प्रवीरशेखरस्य विक्रमचमत्कारप्रत्यक्षीकृतविक्रमादित्यस्य महाराजश्रीवीरधवलस्य सभायाम्, यः अन्तरायः सम्भाव्यते ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

बहिरिह विरह[हर]न्तां मन्दुराभ्यस्तुरङ्गा-
स्तदनु च हयपालैराशु सज्जीक्रियन्ताम् ।
अपि च समरवीरैर्गृह्यतां वर्म धीरै-
र्भ्रमतु च हरिदभ्रं भूरिभेरीनिनादः ॥ ८ ॥

**सूत्रधारः**—कथमारब्धमस्मदीयैः कुशीलवैः ? यदयं **स्तम्भतीर्थ**लङ्करणस्य महाराजश्री**वीरधवल**सचिवस्य **वसन्तपाल**स्य जृम्भते समरसमारम्भः । इतश्च नेदीय एव प्रगल्भते बन्दिवृन्दम् । तदेहि समीहितं सम्पादयावः । ( इति निष्क्रान्तौ । )

## ॥ प्रस्तावना ॥

( ततः प्रविशति ससम्भ्रमं बन्दिवृन्दम् । )

**बन्दिराजः**—रे रे नग्नमागधा मदनुयायिनः ! सत्वरं सत्वरं परिक्रम्यताम्, यदयमस्माकं स्वामी महाराजश्री**वीरधवल**सचिवो **वसन्तपालः**—

पृष्ठे कृत्वा **स्तम्भतीर्थं**, विदित्वा चारद्वारा शङ्खवीराभियोगम् ।
आह्वातुं तान् सत्वरं सङ्गरोत्कः शत्रूनस्मान् प्रेषयामास भट्टान् ॥ ९ ॥

**नग्नकः**—[1]हंहो बंदिपुरंदर ! कहं **संगामसीहा**वरणामधेओ **सिंधुवाल**णंदणो बालत्तणप्पहुदिपसिद्धविक्कमचमक्कारिदरायमंडलो **वसंतवाल**सचिवेण अंगविज्जदि ? ।

**बन्दीन्द्रः**—अये ! न जानासि **वसन्तपाल**स्य महाराजश्री**वीरधवल**प्रतापपावकप्रदीपनपवनस्य रहस्यम् । तथाहि—

प्राप्ते प्रत्यर्थिनां सैन्ये दैन्ये यः पुनरर्थिनाम् ।
असूनां च वसूनां च न धत्ते गणनामपि ॥ १० ॥

**मागधाः**—[2]बंदिराय ! पिच्छ पिच्छ, एसो पुरदो पयंडपुंडपुंडरीयसंडमंडिदे कासारवरे पाइयसलिलोसरंतपउरपरिस्समं वाहव्वूहं बहलं च पत्तिवलं सज्जीकडुअ संपत्तोय्येव रणरहसुक्कंखिरो **संख**वीरो ।

---

१ हंहो वन्दिपुरन्दर ! कथं सङ्ग्रामसिंहापरनामधेयः सिन्धुपालनन्दनः बालत्वप्रभृतिप्रसिद्धविक्रमचमत्कारितराजमण्डलः वसन्तपालसचिवेन अङ्क्यते ॥

२ वन्दिराज ! पश्य पश्य, एष पुरतः प्रचण्डपुण्ड्रपुण्डरीकषण्डमण्डिते कासारवरे पायितसलिलापसरत्प्रचुरपरिश्रमं वाहव्यूहं बहलं च पत्तिबलं सज्जीकृत्य सम्प्राप्त एव रणरभसोत्कण्ठाशीलः शङ्खवीरः ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**बन्दिराजः**—( दृष्ट्वा सहर्षम् ) आर्य !

मूर्तो वीररसः प्रसन्नमहिमा सोऽयं जयश्रीपरि-
ष्वङ्गप्रश्रयलम्पटो घटयति प्रीतिं परां नेत्रयोः ।
यद्दोर्दण्डमखण्डविक्रमचमत्कारं समालोकय-
न्नानन्दप्रवरेण **सिंह**नृपतिः प्रत्यर्चयामासिवान् ॥ ११ ॥

भवतु । स्वनियोगं सम्पादयामः, यदयमतिनेदीयानेव सङ्गरप्रसङ्गरसिकः **सङ्ग्रामसिंहः** । ( इति बन्दिभिः सहोपसृत्य ) भो भोः **सिन्धुराज**नन्दन ! **सिंह**-भटप्रकटप्रताप ! **शङ्ख**वीर ! अयमयं त्वां **वसन्तपालः** समाह्वयते । अयं च तदीयः सन्देशः :—

एतल्लुण्टितुमागतोऽसि नगरं यैरेव गाढैः पदै-
स्तैरेव द्रुतमेहि, मे हितमहो ! नातः परं जृम्भते ।
अद्य त्वां परिमृद्य **शङ्ख**ममुना शस्त्रेण ताडङ्किनीं
कीर्त्तिं कन्दलयामि **वीरधवल**स्योद्दामदोःसम्पदः ॥ १२ ॥

किञ्च—

दृष्टास्तेऽन्ये समिति सुभटाः पाटवं नाटयित्वा
येषामग्रे किमपि भुजयोरर्जिता शौर्यसम्पत् ।
अद्योद्दामद्विषदवनिपस्त्रैणसिन्दूरमुद्रो-
न्मर्दप्रौढाननुभव दृशा **वस्तुपाल**स्य वीरान् ॥ १३ ॥

( नेपथ्ये कलकलः । )

( सर्वे समाकर्णयन्ति । )

( पुनर्नेपथ्ये ) किमयकाण्डचण्डिमोड्डामरः पामरैरिव भवद्भिर्बन्दिजने परवचनासु-(?नु)वादिनि विधीयते धिक्कारकोलाहलः ! । तत् क्षणं यथावस्थितमेव स्थीयताम् । अहमेव बन्दिनः प्रबोध्य नन्दयामि ससंरम्भम्—अहो बन्दिचक्रवर्त्तिन् ! न लज्जते यद्येवं प्रलपन् वस्तुपालः तत् कथं भवानपि न त्रपते ? । पश्य,

येनाकारि स **सिंहण**क्षितिपतिर्नासीरसेनाजय-
क्रीडादुःसहसाहसेन सहसा सौहार्दमुद्रास्पदम् ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

तस्मिन् जाग्रदसङ्ख्यसङ्ख्यविभवे **शाङ्खे** मयि स्पर्धते
युद्धार्थे यदि **वस्तुपाल**सचिवो धिग् धिग्! भुजस्फूर्जितम् ॥ १४ ॥

तदेहि गृहाण प्रसादम्। अनुगृहाण गत्वा सम्प्रति मद्वचसा **वसन्तपालम्**। तथा च स एवं वाच्यः—

नियोगी त्वं विद्वानसि न मम संरम्भविषय-
स्ततोऽहं मन्दोऽस्मि व्रज निजमुपादाय विभवम्।
समृद्धं त्रायन्तां परम**परवीरापुर**मिदं
समायातु त्रातुं स्वयमथ स वा **वीरधवलः** ॥ १५ ॥

किञ्च—

को मे पूरयिताऽस्ति **शाङ्ख**समरे दोर्दण्डकण्डूरसं?
खड्गाखड्गिकलासु कौशलमिदं को वाऽथ मे विन्दति?।
एते **स्तम्भपुरी**पराभवसमारम्भैकहेवाकिनो
लज्जन्ते मम **वस्तुपाल**विजयोत्साहेन सेनाचराः ॥ १६ ॥

**मागधाः**—(सक्रोधमुच्चैः) [1]कथं साहणवालसाहणावट्टंभिओ पउरवारणेहि आवरिओ महारायसचिवसेहर**वसंतवाल**नासीरोयरंतसुहडमंडलीसंतासेण आवायमत्थयगहियगरुअलोहसन्नाहो वि अवलेवं पयडंतो रे **संख**! न लज्जसि?। अणुहविस्ससि दाणिं य्येव अम्ह सामिणो महाराय**वीरधवला**मच्चतिलयस्स **वसंतपाल**स्स निओइत्तणं। पिच्छ पिच्छ—

भुयबलदलियाए अज्ज दे वाहिणीए
सुहडधडकडप्पुम्मद्दसंगम्मिराहिं।
रुहिरमसिकिवाणीलेहणीहिं लिहंती
तुह समरणिओए अत्थु वा **वत्थुवालो** ॥ १७ ॥

---

१ कथं साधनापालसाधनावष्टब्धः प्रचुरवारणैः आवृतः महाराजसचिवशेखरवसन्तपालनासीरावतरत्सुभटमण्डलीसन्त्रासेन आपादमस्तकगृहीतगुरुकलोहसन्नाहः अपि अवलेपं प्रकटयन् रे शङ्ख? न लज्जसे?। अनुभविष्यसि इदानीं एव अस्माकं स्वामिनः महाराजवीरधवलामात्यतिलकस्य वसन्तपालस्य नियोगित्वम्। पश्य पश्य—

भुजबलदलितायाः अद्य ते वाहिन्याः सुभटकबन्धसमूहोन्मर्दसङ्गमित्रीभिः।
रुधिरमषीकृपाणीलेखनीभिर्लिखन्ती तव समरनियोगे अस्तु वा वस्तुपालः ॥ १७ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**बन्दिराजः**—साधु रे नम्रमागधाः! साधु । ( शङ्खमुद्दिश्य )

अन्तः कौटिल्यमुल्लासयसि यदि सखे **शङ्ख**? युक्तं तदेतत्,
यश्चायं कोऽपि नादः समजनि तव सोऽप्यङ्ग? मङ्गल्यमात्रम् ।
गर्वस्तस्मादखर्वः किमयमयमियान्? दृश्यतामेष तावद्
वीरो दोष्मज्जुजोष्मप्रशमनकमनीयाकृतिर्**वस्तुपालः** ॥ १८ ॥

( सत्वरं व्यावृत्त्य ) अये? कथमयमवज्ञाय बन्दिवचनान्यस्मानप्यवधीर्य धैर्यावष्टम्भगम्भीरैः पदैः प्रचलित एव **वसन्तपाल**मभिषेणयितुं **शङ्ख**प्रवीरः? । भवतु, तद् वयमपि त्वरितमुपसृत्य निवेदयामः स्वामिने सर्वमर्वाचीनं वृत्तम् । ( इति परिक्रामन्ति । )

**मागधाः**—[१]बंदिराय! फेरक फेरक किं दाणिं सामिणो संसणिज्जं? । जं एदे विसमदुग्गीकयं **खंभइत्थ**परिसरं परिहरिऊण **महिमहोअहि**परिरंभरमणिज्जेण मग्गेण पविसंता **संख**स्स असंखा पायवला सलीसंति । एसा य महाणाययस्स **वसंतवाल**स्स धाणुक्कधोरणी तहिं चेय परिट्ठविया तेहिं सह विलग्गंती विय पडिहायइ ।

**बन्दिराजः**—( विलोक्य ) अहो! सन्नाहग्रहणसमयः सुभटानाम् । यतः—

अमी प्रवरपत्तयः प्रतिविशन्ति वेगान्**मही-**
**महोदधि**समागमव्यतिकरेण दर्पोद्धताः ।
ततश्च शरसन्ततिं विकिरिता धनुर्धारिणां
गणेन परितो हताः किशलयन्ति सन्धाविदम् ॥ १९ ॥

( पुनर्निरूप्य ) अहो! महत् कदनमुपक्रान्तं मिथो नासीरवीरैः । यतः—

तूणादाकृष्य बाणानथ धनुषि समारोप्य नीत्वा च कर्ण-
प्रान्तं यावत् क्षिपन्तः समरभुवि रुषा पत्तयः सञ्चरन्ति ।
अन्योन्यं चाऽऽहतानामरुषि परुषितैर्मार्गणैर्लक्ष्यपुङ्खै-
रेषां रेखाऽपि नीलोत्पलवलयमयी लक्ष्यते मूर्छितानाम् ॥ २० ॥

तद् यावदस्मदीशेन समं न समरमारभन्तेऽमी परिपन्थिनस्तावदेव सन्निहिता भवामः ।

---

१ बन्दिराज! पुनः पुनः किमिदानीं स्वामिनः शंसनीयम्? यद् एतें विषमदुर्गीकृतं स्तम्भतीर्थपरिसरं परिहृत्य महीमहोदधिपरिरम्भरमणीयेन मार्गेण प्रविशन्तः शङ्खस्य असङ्ख्या पादबलाः सरीसरन्ति । एषा च महानायकस्य वसन्तपालस्य धानुष्कधोरणी तत्र एव परिस्थापिता तैः सह विलगन्ती इव प्रतिभाति ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**अन्ये**—'एसो खु अवसरो णवरं भट्टजणस्स दारुणो। तहा—

अण्णुण्णपक्खगमणुत्तेअणगहणाइं हुंतु सव्वस्स।
समरपवेसम्मि पुणो णमो णमो भट्टजाईए ॥ २१ ॥

**बन्दिराजः**—सत्यमेतत्। (इति परिक्रम्य) कथं महाराज**वीरधवल**रुचि-वशचीरतिर्**वसन्तपालो**ऽपि पुरः पर्याप्तप्राय एव, किं पुनः समरसमारम्भसंरम्भसुदुर्धरैः **शङ्ख**सेनाप्रवीरैः स्वकीयैश्च गुलकुलप्रभव**भूणपाल**प्रभृतिभिरहमहमिकया युद्धादेश-मर्थयमानैरप्राप्तप्रवेश एव संवृत्तः। तत् किं कुर्मः ?। यथाऽस्मन्निवेदनीयम् तन्निवेदित-मनेनैव सङ्ग्रामग्रहिलेन **सङ्ग्रामसिंहेन**। (बन्दिजनं प्रति) भो भो मागधाः !

यदयमुदितः संवर्त्ताम्भोधरस्तनितश्रुति-
प्रतिभटनटद्दुर्जानादः परस्परसङ्गरः।
तदनवसरोऽस्माकं सम्प्रत्यमुं समरोत्सव-
व्यतिकरमिह स्थित्वैवाऽऽलोकितुं मृगयामहे ॥ २२ ॥

**सर्वे**—(सानन्दम्) 'एवं भोदु। अम्हाणं भायधेएण एयारिसी समुप्पण्णा मई भट्टरायस्स। अण्णधा अण्णोण्णसंरंभपडंतबाणप्पहारमज्झम्मि परिब्भमंतं अम्हारिसं उज्झियवुण्णपुण्णकरं पि को तीरइ रक्खिदुं पि ?।

**बन्दिराजः**—पश्यत पश्यत—

प्रतिभटघटामावासस्य प्रहाय समुत्थिता-
महह ! सहसा हन्तुं प्राप्ताऽस्मदीयवरूथिनी।
अपि च समरव्यापाराय क्षणं स्पृहयालवो
बत ! कतिपये नाङ्गं संवर्मयन्ति चमूचराः ॥ २३ ॥

---

१ एष खलु अवसरः केवलं भट्टजनस्य दारुणः, तथा—
अन्योन्यपक्षगमनोत्तेजनग्रहणानि भवन्तु सर्वस्य।
समरप्रवेशे पुनः नमो नमो भट्टजात्यै ॥ २१ ॥

२ एवं भवतु, अस्माकं भागधेयेन एतादृशी समुत्पन्ना मतिः भट्टराजस्य, अन्यथा अन्योन्यसंरम्भपतद्बाणप्रहारमध्ये परिभ्राम्यन्तं अस्मादृशं उज्झितवुण्ण (?) पुण्यकरमपि कः तरति रक्षितुमपि ?।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**बन्दिराजः**—(विलोक्य) [1]'अहो! सावसाहत्तणं (सावहाणत्तणं) साहसं च महाराय**वीरधवल**सचिवस्स **वसंतवाल**प्पवीरस्स। जं एदं—

सव्वत्तो पविसंति जे वि सुहडा **संखस्स** संखे विय
ते तट्ठाणनिओइएहि सहसा पत्तीहिं जुत्तीहिं वि।
जे वीरा सवडम्मुहा उ ण रणे ताणं हसंतो पयं
अग्गग्गे वियरेइ संगरसिरीसंभोअरोमंचिओ ॥ २४ ॥

**बन्दिराजः**—(सोत्साहमात्मवृन्दं प्रति) उपरतं तावत् परस्परप्रहारमूर्छितैर्नासीरकाण्डीरैः। सन्नह्यन्ति च साम्प्रतं प्रवरवीरपुरुषाः। (ऊर्ध्वमवलोक्य) उपस्थितश्चायमस्माकं मध्याह्निको मङ्गलावसरः। तदग्रतो मध्याह्नवर्णनद्वारेण स्वामिनमनुसरामः।

**नग्नमागधाः**—

(उच्चैः)

[2]'अस्सिन् नासीरसेणासरहसविसिहुम्मुक्कधाणुक्कचक्क-
द्दोणीरत्तप्पवाहं लहिय दियवरा पिच्छ मज्जंति गिद्धा।
अंतालीलोलदब्भंकुरगहणचणा किं पि मंतं पढंता
एसो मज्झण्हकालो कवलतु कलुसं तुज्झ सेणाभडाणं ॥ २५ ॥

(उच्चैः)

अयमुदयगिरीन्द्रादुत्पतिष्णुस्त्वदीयं समरममरवृन्दैः साकमालोकमानः।
प्रसृमरशरजालव्याकुलाकाशभीतिव्यतिकरित इवार्कश्चुम्बति व्योमचूडाम् ॥२६॥

---

१ अहो! सावधानत्वं साहसं च महाराजवीरधवलसचिवस्य वसन्तपालस्य, यद् एतत्—
सर्वतः प्रविशन्ति येऽपि सुभटाः शङ्खस्य सङ्ख्ये इव
ते तत्स्थाननियोगिकैः सहसा पत्तिभिः युक्तिभिः अपि।
ये वीराः सम्मुखाः तु न रणे तेषां हसन् पदं
अग्राग्रे वितरति सङ्गरश्रीसम्भोगरोमाञ्चितः ॥ २४ ॥

२ अस्मिन् नासीरसेनासरभसविशिखोन्मुक्तधानुष्कचक्र-
द्रोणीरक्तप्रवाहं लब्ध्वा द्विजवरा पश्य मज्जन्ति गृध्राः।
अन्त्रालीलोलदर्भाङ्कुरग्रहणचणाः किमपि मन्त्रं पठन्तः
एषः मध्याह्नकालः कवलयतु कलुषं तव सेनाभटानाम् ॥ २५ ॥



P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

किञ्च—

दिग्भित्तीः समतां नयन्निव करैरुन्मानदण्डप्रभै-
रन्तर्वारिरहां विशन्निव कियद् बिम्बानुबिम्बच्छलात् ।
ब्रह्मस्थानपठन्महर्षिनिवहप्रोद्दामसामस्वर-
प्रौढिप्रीत इव क्षणं न चलति व्योमाऽऽदरादर्यमा ॥ २७ ॥

अपि च—

तेजो मूर्तमुदेति वीरधवलस्यैतद् यदूर्ध्वं मह-
त्पिण्डं चण्डमरीचिमण्डलवपुर्व्योमाङ्गणे वल्गति ।
सङ्क्रान्तं च वसन्तपाल ! नियतं प्रत्यग्रमङ्गेषु ते
येन द्वेषितमिश्रघस्रकरक्रोडः परिक्रीडसे ॥ २८ ॥

( परितो निरूप्य ) अहो ! मध्याह्नसमयदुरुत्सहः सहस्रभानुः । तथाहि---

अशितमसितं पूर्वं हालाहलं पुरवैरिणा
किमिदमधुनोद्गीर्णं तच्छोणितारुणितच्छवि ।
ज्वलनजयिभिस्तेजोजालैर्यदंशुमतो मिषात्
कवलयति तन्मूर्ति व्योमाप्यनश्वरमत्सरम् ॥ २९ ॥

अपि च—भो भोः !

प्रसृमरकरजालव्यस्तपाथोजपत्रव्यतिकरमकरन्दस्यन्दबिन्दूक्षराणि ।
कलितसकलविद्यः शेषविद्यासमाप्तेः पठति नियतमीशस्तेजसां ते यशांसि ॥३०॥

( नेपथ्ये )

अयि भट्टशिरोमणे ! पूरितास्त्वया मे मनोरथाः । यतः—

प्रकटमकपटानां वीरसेनाभटानां सपदि भुवनपालप्रेमराणाममीषाम् ।
यदयमजनि वाक्यैः प्रायशः प्रेरितैस्तेऽभिनवविजयलक्ष्मीकेलिकल्याणदूतः ॥३१॥

( पुनर्नेपथ्ये )

अन्यः—हंहो महाराजवीरधवलमहामात्य वस्तुपाल ! वीरधौरेय ! किम-
द्यापि निरीक्षसे ? ।

P. P. Ac. Gunratnasuri M.S.   Jin Gun Aaradhak Trust

मध्येऽरत्तनमुद्यमं वितनुते **शङ्खः** प्रवेष्टुं क्षण-
दायातुं पुरतः पदानि भवतो द्वित्राण्यसौ यच्छति।
भ्राता चास्य न **सूरपाल**सुभटोऽस्माकं पुरोवर्तिनी
निष्प्राणः पृतनामनादरपदं कर्तुं त्वया युज्यते ॥ ३२ ॥

तद् देहि मे स्वकरेण बीटकप्रसादम्। नहि स्वामिनियोगाद् ऋते शस्त्राजीविनां युद्धाधिकारः। पश्यतु च मे कौतुकं भवान्—

अस्मिन्नालोक्यमाने प्रसरति पुरतः **शङ्खराजस्य** सैन्ये
कुत्राऽऽस्ते **शङ्ख** इत्थं वदति मयि करक्रोडजाग्रत्कृपाणे।
योऽसावेषोऽहमस्मीत्यपि मम पुरतो वक्ष्यति द्रक्ष्यति द्राग्
दीर्घं निद्राणमेव क्षितिरजसि भवानद्य तं **वस्तुपालः** ॥ ३३ ॥

**बन्दिराजः**—साधु भोः सकलगौलकुलालङ्कार **भुवनपाल**! यदेवमतिनेदीयसि शौर्यनिर्यासनिकषपाषाणे रणे तवैव परमेवंविधानि शोभन्ते प्रतिज्ञावचांसि। तथा हि—

सन्नद्धासु विरोधिसैन्यसुभटश्रेणीषु ये सम्मुखं
धावन्तीषु विनिद्रपौरुषरसाः प्रोद्भिन्नरोमाङ्कुराः।
गर्जन्ति प्रहसन्ति सम्मुखमुदीक्षन्ते समालिङ्गितुं
वाञ्छन्ति प्रसरन्ति वीरसरणिस्तैरेव शृङ्गारिता ॥ ३४ ॥

**मागधाः**—[1]भट्टराय! पेक्ख पेक्ख, एसो खु **भुअणवालो** महाराय**वीरधवला**मच्चस्स **वसंतवाल**स्स सयं य्येव संगरुक्कंठिअस्स निओअं घेत्तूण अणिम्मिअसीसओ असंवम्मिअकलेवरो य्येव सन्नद्धस्स **संख**सुहडसंघट्टस्स हकंतो सम्मुहं पविसइ। अदोऽवरं च धूलिजालंधयारियम्मि गयणयले पा किं पि लक्खिज्जदि।

**बन्दिराजः**—अहो! महत् साहसम्। (अन्यतो निरूप्य) कथमयमितः परिमितैरेव वीरैरप्रतीक्षितपृतनाडम्बरः पुरः सोत्साहानि पदानि इव वीक्ष्यते **श्रीवीर**सचिवो **वसन्तपालः**?। (पुनर्निरूप्य) अहो! कौतुकम्—

---

१ भट्टराज! प्रेक्षस्व प्रेक्षस्व, एष खलु भुवनपालः महाराजवीरधवलामात्यस्य वसन्तपालस्य स्वयमेव सङ्गरोत्कण्ठितस्य नियोगं गृहीत्वा अनिर्मितशीर्षकः असंवर्मितकलेवरः एव सन्नद्धस्य शङ्खसुभटसङ्घट्टस्य हक्कयन् सम्मुखं प्रविशति, अतोऽपरं च धूलिजालान्धकारिते गगनतले न किमपि लक्ष्यते ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

विभिन्दाना भल्लैरसिभिरथ बाणैः प्रतिभटान्
पुरः प्रत्यासन्नान् विघटयति चाग्रे सरति च ।

( सविस्मयम् )

न जानाम्यभ्यस्ता समरपरिपाटी कुत इयं ?
कुतो वेदं धैर्यं ? कुत इदमखिन्नत्वमथवा ? ॥ ३५ ॥

( विचिन्त्य ) अहह !

मन्त्रीन्द्रेणाद्य यावत् क सचिवपदवीचञ्चितं विश्वमेतत् ?
कुत्रेयं सम्परायाचरणचतुरता ? साहसं कुत्र चैतत् ? ।
येनासौ केक(व)लं नौ निजनगरमधिष्ठाय पृष्ठेन तिष्ठन्
यस्यां यस्यां दिशि स्यादहितकलकलस्तत्र तत्रापि दृष्टः ॥ ३६ ॥

अथवा धन्या सा जननी **कुमारदेवी** यत्कुक्षेः क्षीरसागरादिव जातान्येतान्यपत्यरत्नानि । तथाहि—

येन स्वस्मिन् नमसि नमसि स्थापयित्वैकपाद-
श्चक्रे धर्मः करणसरणिस्वैरसञ्चारचारु ।
केनं श्लाघ्यः स खलु कलुषध्वान्तनिष्पेषपूषा
निर्दोषत्वात् पिशुनमनसां शल्यदो मल्लदेवः ॥ ३७ ॥

किञ्च—

यत्राऽऽरोप्य भुजङ्गपुङ्गव इव श्रीवत्सलक्ष्माभरं,
निर्व्याजं रमया स **वीरधवलः** सार्धं परिक्रीडते ।
एकस्तावदितः कलासु निपुणः सीमा गुणग्राहिणां,
**तेजःपाल** इति प्रसिद्धमहिमारत्नं न कैर्वर्ण्यते ? ॥ ३८ ॥

तथाऽयं च किं कथ्यते ?—

मार्गान् यः परितोऽवरुध्य गुणिनो यत्र क्वचिद् गच्छतो-
ऽप्यानीय प्रथमं दुकूल-तुरग-स्वर्णैः समभ्यर्चति ।
आहूय द्विषतोऽपि बन्दिवचनैरेवं विधत्ते रणं,
सोऽयं हन्त ! **वसन्तपाल**सचिवः केषां वचोगोचरः ? ॥ ३९ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

अथवा **आसराज**गुणेभ्य एव नमः, यैरयमलौकिकसन्तानः समतन्यत। तथाहि—**वस्तुपाल**स्य पुत्रे **जैत्रसिंहे** हृदयवर्तिनि कस्याधि[का]रः?।

यः शैशवे विनयवैरिणि बोधवन्ध्ये
धत्ते नयं च विनयं च गुणोदयं च।
सोऽयं मनोभवपराभवजागरूक-
रूपो न कं मनसि चुम्बति **जैत्रसिंहः**? ॥ ४० ॥

(कलकलमाकर्ण्य) यदयमुद्धूतधूलिधोरणीदुरवगाहसुभटसङ्घट्टे महानाकस्मिकः कलकलः तज्जाने—**भुवनपालेन** वा **शङ्खराजः**, **शङ्खराजेन** वा **भुवनपालः**, शान्तं पापम्, प्रतिहतममङ्गलम्। (पुनरन्यतोऽवलोक्य) इतश्च स्वामिना **वीरनरेन्द्र**सचिवेन **वसन्तपालेन** कतिपयप्रवीरपरिवारेणैव च यत् कृतं तदपि भोः! पश्यत—

आरूढास्तुरगेषु ये भुजमदेनान्धम्भविष्णुस्यदाः
**शङ्ख**स्योपनताः समुद्धतमहःसम्पत्तयः पत्तयः।
क्रूराः **कल्हण-वैजल**प्रभृतयस्ते **वस्तुपालेन** ता-
मानीयन्त दशां यथा क्षितिममी संश्लिष्य संशेरते ॥ ४१ ॥

इतश्च—

यः **सिन्धुराज**तनयः किल **शूरपालः**,
श्रीमानसौ विकटशस्त्रपविप्रहारैः।
आघातितश्च तुरगाद् विनिपातितश्च,
नीतश्च बन्दिभिरतो बत! जीवशेषः ॥ ४२ ॥

अस्तु, चतुरङ्गुरङ्गत एव कीनाशस्य। अपि च पश्यत पश्यत—तुरङ्गादुत्तीर्णं करकरम्बितकरवालं **वीरमं** वीरमण्डलीमुद्योतयन्तम्। अपि च—

उपरि परिपतन्तमन्तकश्रीः समिति निहत्य रिपुव्रजं व्रजन्ती।
तनुरनुपमास्पदं रुचीनां रचयति चण्डमरीचिरोचिरैक्यम् ॥ ४३ ॥

**मागधाः**—[१]कथं एसो तारयरो संरंभगंभीरो **भुवणवाल**स्स विजयसंख-सरिच्छच्छई सद्दो सुणिज्जदि?।

(सर्वे आकर्णयन्ति।)

---

१ कथ एषस्तारतरः संरम्भगम्भीरो भुवनपालस्य विजयशङ्खसदृशच्छविः शब्दः श्रूयते ॥

P. P. Ac. Gunratnasuri M.S.                Jin Gun Aaradhak Trust

( नेपथ्ये )

आः पिण्डीशूर ! किं दूरमात्मानं तिरयसि ? ।

एकः **शङ्खो** हत इह कृता येन शङ्खोऽहमस्मी-
त्युच्चैर्वाचः पुनरपि तथैवापरस्ताद् द्वगन्यः ।
तद् भोः ! सत्यं कथय कियती **सिन्धुराज**प्रसूता
राजश्रेणी ? भवतु यदि वा तामशेषां छिनद्मि ॥ ४४ ॥

( पुनः सोऽप्रासहासम् ) धिग् मूढ ! किमनेन कपटपाटवावष्टम्भेन ? । आयातोऽसि महाराज**वीरधवल**मूर्त्तप्रतापेन **वस्तुपालेन** सह योद्धुम् । किञ्च—रे दुर्विनीत !,

**महाराष्ट्रक्षोणीपति**बलमवष्टभ्य पुरतो
**मरुक्षोणीपालै**रपि सह मिलित्वा किमकृथाः ? ।
अये गेहेनर्दिन् ! स किमपचितो **वीरधवल**-
प्रतापाग्निर्यत् त्वं पुरमिदमवाप्तुं व्यवसितः ॥ ४५ ॥

**बन्दिराजः**—( सहर्षम् ) साधु वीरकिरीटरत्न ! साधु । सत्यं **भुवनपालो**ऽसि ।

**मागधाः**—

[1]दिव्वम्मि दुव्विणीए होइ न किं पिच्छ **संख**वीराण ।
परिणामदारुणो जम्बुलो वि गरलक्खणं पत्तो ॥ ४६ ॥

( पुनर्नेपथ्ये )

**शङ्खः**—( सप्रहासमुच्चैः ) आः ! किमित्थं विकत्थसे ? ।

रणभुवि परिहासं यत् त्वयासार्द्धमद्य-
व्यरचयमहमेतेनान्तरालेन गत्वा ।
कृतक्षतकमदाहाङ्गीकृतीनां भटानां
समिद्नवहितानामग्रहीस्त्वं शिरांसि ॥ ४७ ॥

एतावतैव किमयमखर्वो गर्वराशिः ? । अपि च रे वाचाट ! शृणु—

---

१ दिव्ये दुर्विनीते भवति न किं पश्य शङ्खवीराणाम् ।
परिणामदारुणः जम्बुलोऽपि गरलक्षणं प्राप्तः ॥ ४६ ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

सैन्यं **सिंहण**पार्थिवस्य यदुपष्टम्याहमभ्यागमं
नाऽकार्षं किमनेन **वीरधवल**स्योक्रमेणाहितम् ? ।
देशः केन हतः **ललाटनृपति-श्रीविक्रमादित्य**यो-
र्भेदः केन कृतस्तथा च विदधे तत् केन पारिप्लवम् ? ॥ ४८ ॥

किञ्च—

देशोऽयं पूर्वजानां स्फुरति च परितो जातिसम्बन्धिबन्धु-
प्रायो लोकस्तदास्तामयमतिशयितः सम्परायस्य यत्नः ।
इत्थं चेन्मानसं स्यान्न मम घनघृणाघूर्णितं वक्ष्यते तत्
केनोर्वी **सिंह**सेनोद्धुरतुरगखुरैर्जर्जरा गूर्जराणाम् ? ॥ ४९ ॥

**बन्दिराजः**—शृणुत भोः ! **शङ्ख**स्य रोषभाषितानि शृणुत । तथाहि—

आविष्कृतानि रणकेलिकलासु वीरै-
रन्योन्यरोषपरुषाक्षरपद्धतीनि ।
पीतानि यैः समरसन्निहितैर्वचांसि
धन्यानि तानि किमपि श्रवणोदराणि ॥ ५० ॥

(पुनर्नेपथ्ये)

**भुवनपालः**—(साकूतमुच्चैः) सत्यमात्थ रे सिन्धुराजनन्दन ! सत्यमात्थ ।
किन्तु—

किमपकृतमतस्त्वयाऽऽगतौ चेदहह ! **महीतट-लाटभूमिपालौ** ।
तदनुबलमवाप्य वा महीयः किमपकृतं **मरुमण्डलक्षितीशैः** ? ॥ ५१ ॥

किं पुनरधिकमुद्योतिता **लावण्यप्रसाद-वीरधवल**योः शौर्यसरणिः । पश्य—

यौ सामन्तौ शौर्यनिष्ठौ गरिष्ठौ तौ निर्यातौ शात्रवे च प्रविष्टौ ।
म्लानेः पात्रं नाभवल्लोममात्रं प्रापाऽऽधिक्यं तेन तत्साहसिक्यम् ॥ ५२ ॥

**मागधः**—[1]जुत्तं खु एसो **भुवणवालो सहजवाल-विक्कमाइच्चाणं** काउरिसत्तणं पयासंतो व **संखं** संखोहेइ ।

१ युक्तं खलु एष भुवनपालः सहजपाल-विक्रमादित्ययोः कापुरुषत्वं प्रकाशयन्निव शङ्खं सङ्क्षोभयति ॥

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( पुनर्नेपथ्ये )

आः! किमधुनाऽपि विलम्बसे? अयमस्मि सत्यशङ्खः। सफलयामि ते समरसर्वधुरीणताश्राद्धं चेतः।

सङ्ग्रामग्रहपरिहासपेशलानां वीराणामनवहितात्मनां व्यधायि।
पापीयो यदनुचितं तदद्य माष्टुं खड्गोऽयं कियदथ मर्षणं तवास्तु ॥ ५३ ॥

**बन्दिराजः**—आः **शङ्ख**! कथं कैतवमात्मनो गोपयसि?।

( पुनर्नेपथ्ये )

**भुवनपालः**—अरे निर्लज्ज!

ये त्वां मत्करवालकालभुजगीदंष्ट्राभिरालिङ्गितं
रक्षन्ति स्म महौषधिप्रणयिभिः प्राणैः प्रवस्य प्रियैः।
तेषां त्वं वधपातकी मम पुरः स्वं नाम यन्नाग्रही-
स्तच्चेन्मार्जितुमीहसे कुरु करे खड्गं स एवासि चेत् ॥ ५४ ॥

**बन्दिराजः**—( श्रुत्वा ) साधु भोः क्षत्रियावतंस! साधु। धन्योऽस्मि, यस्य मे त्वमेवमव्याजवीरव्रतो मित्रम्।

[ **वसन्तपालः**— ]

एकोऽनेकान् प्रवीरानकवचिततनुः **शङ्ख**नामप्रकोपा-
दाहत्यासत्यभीरुः पुनरयमयसे **सिन्धुराजात्मजं** यत्।
तेनाद्य प्रेयसाऽमी वयमपि परमां कोटिमारोपिताः स्म
तत् त्वामालिङ्गितुं मे पुलकमुकुलितो बाहुरुत्कण्ठितोऽयम् ॥ ५५ ॥

**बन्दिराजः**—( सहर्षम् ) कथमयं महाराज**वीरधवल**महामात्यो **वसन्तपालो**ऽपि समाकर्ण्य कर्णयोरमृतमिव **भुवनपाल**वचः प्रचलित एव?।

**मागधाः**—[1]**बंदिराय!** पेच्छ पेच्छ, एसो खु **वीरनरिंद**सचिवस्स **वत्थुपाल**स्स सामिणो **भुवणवाल**पडिग्गाहणसाहससरहसचलंतस्स पुरओ कुंजरवरघोरहत्थपीवरं भुअंडं घेत्तूण उवत्थिदो को वि पुरिसो।

---

१. बन्दिराज! पश्य पश्य, एष खलु वीरनरेन्द्रसचिवस्य वस्तुपालस्य स्वामिनः भुवनपालप्रतिग्रहणसाहससरभसचलतः पुरतः कुञ्जरवरघोरहस्तपीवरं भुजदण्डं गृहीत्वा उपस्थितः कोऽपि पुरुषः।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**बन्दिराजः**—( विलोक्य ) आः ! कथमयं वीरश्रीविश्रामभूर्**भुवनपाल**स्य बाहुः ? । आः ! कष्टम् ।

छिन्नो नूनमनेककृत्रिमभवत्**सङ्ग्रामसिंहा**हव-
व्यापारप्रसरावकाशममुना **शङ्खे**न लब्धा भुजः ।
वीरस्यास्य **वसन्तपाल**सुहृदः सार्द्धं स्वजीवव्यय-
त्रासव्याकुलताभरेण विजयश्रीकेलिविश्रामभूः ॥ ५६ ॥

भवतु शृणुमस्तावदस्य भाषितम् । एतदनन्तरं च स्वामिनो **वस्तुपाल**स्य ।

**( नेपथ्ये )**

**पुरुषः**—( **वस्तुपाल**स्य पुरतो बाहुमुत्क्षिप्य ) अयमुपायनीकृतस्ते सुहृदः **शङ्खे**न **भुवनपाल**स्य भुजस्तम्भः । उक्तं च—

यदतुलबलावष्टम्भेन त्वमाहवडम्बरं
वहसि हसिता येनास्माकं भटेन वरूथिनी ।
तव रणजयप्रत्यग्राशावलम्बनमाक्ष्यता-
मयमयमयं बाहुस्तस्याऽऽहवाच्च निवर्त्यताम् ॥ ५७ ॥

**वस्तुपालः**—( स्वगतं सखेदम् ) कथमतिभूमिं नीतो **भुवनपाले**न साहस-प्रसारः ? । यतः—

**शङ्ख**नाम्ना निहत्याजौ द्वित्रान् न व्यरमद् भटान् ।
**अथवा धिगस्मानेव ।**
प्रत्यग्राहि स धावित्वा यदस्माभिर्न मन्थरैः ॥ ५८ ॥

( प्रकाशं सरोष-संरम्भम् ) आः ! किमलीकप्रमोदेन विडम्बयत्यात्मानं ते ? ।

**शङ्खः**—शृणु—

कति न **भुवनपालाः** सन्ति नः सन्तु मा वा
जयति स परमेको वीर ! **वीर**प्रतापः ।
व्रज कथय यदि त्वं **सिन्धुराज**स्य नेतु-
स्तदयमहमुपेतस्तिष्ठ तिष्ठ क्षणार्द्धम् ॥ ५९ ॥

अन्यदप्येवं वाच्यस्त्वया निजस्वामी ।

येनाऽऽनीयत **वर्गपाटकनटे** क्षेत्रे **मरुक्ष्माभुजां**
गर्वं खर्वयता कबन्धपदवीं **नड्डूलभूमीपतिः** ।
मन्त्री मित्रममुष्य **वीरधवल**स्याऽऽयाति रुष्टो जवाद्
वीराणामधिदैवतं त्वदुदरादाकृष्टुमिष्टं निजम् ॥ ६० ॥

**बन्दिराजः**—अये ! उद्घाटितमिदानीं **भुवनपाल**शोकसञ्जातरोषेण महाराज**वीरधवल**महामात्येन **वस्तुपाले**न शिरः, यदयमन्य एव वीक्ष्यते । अथवा—

तावद् वीरा धीरा यावन्न प्रकटयन्ति युधि रोषम् ।
प्रकटितरुषाममीषां शङ्के ग्रासः स कीनाशः ॥ ६१ ॥

तदिदमुपस्थितं **शङ्ख**पराभवनिर्वहणम्, यदयमुदीर्य साटोपानि पदानि साटोपैरेव पदैः प्रस्थितः **शङ्ख**सम्मुखं श्रीवीरशक्रमूर्तप्रतापो **वसन्तपालः** ।

**मागधाः**—[1]पेक्ख पेक्ख, एसो खुरो स समुज्जलिय**वसंतवाल**पुहुडसंघट्टमीडिए **संखसेन्ने** अलक्खिदस-परविहाओ को वि विमद्दो पलयपावयदारुणो दीसदि ।

**बन्दिराजः**—एवमेतत् ।

मिथः प्रकटसम्भ्रमद्विपदनीकिनीसम्भिदा-
समुत्थितरजोभरव्यतिकरान्धकारेऽम्बरे ।
चलाचलसमुच्छलत्तरलखड्गरोचि-
श्छटातडिन्निरहदन्तुरे प्रलयकेलिरालोक्यते ॥ ६२ ॥

(पुनर्दृष्ट्वा सहर्षम्) कथमयं परतो विशरारुरिव **शङ्ख**वक्त्रिच्छिन्नार्चि गोलकः । आः ! कथमपक्रान्त एव वराकः ? । धन्योऽसि महाराज**वीरधवल**महामात्य **वसन्तपाल** ! धन्योऽसि ।

येन **सङ्ग्रामसिंहो**ऽयं त्रासावेशपलायितः ।
हन्त ! सङ्ग्रामगोमायुपदवीमध्यरोप्यत ॥ ६३ ॥

(नेपथ्ये)

आः पाप ! निस्त्रप ! क्व यासि ? ।

---

१ प्रेक्षस्व प्रेक्षस्व, एष खलु रोषसमुज्ज्वलितवसन्तपालप्रभटसङ्घट्टमीलिते शङ्खसैन्ये अलक्षितस्वपरविभागः कोऽपि विमर्दः प्रलयपावकदारुणो दृश्यते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

आयातोऽसि किमर्थमाहवमुखश्रद्धालुना चेतसा ?
न ज्ञातो भविता स **वीरधवल**क्ष्मीन्द्रः प्रतापानलः ।
यस्मिन् विस्मयनीयपौरुषरसाक्रान्तक्षमामण्डलो-
ऽप्याशङ्कापिशुनं न मुञ्चति मनः श्री**सिंहण**क्ष्मापतिः ॥ ६४ ॥

**बन्दिराजः**—कथमयमस्मत्स्वामिना विद्राव्यमाणस्तर्जितः **शङ्खराजः** ? । (निरूप्य च) समायाति चायमनुयायिभिर्वीरैराकृष्टो विजयश्रीमहोत्सवस्तबकितानन्दः **शङ्ख**पराभवप्रबन्धकविः श्री**वीरधवल**सचिवरत्नं **वसन्तपालः** । मृगयते चास्मानेव निरूपयितुं समरपतितान् वीरान्, तदुपतिष्ठामहे । (उच्चैः) स्वामिन् ! **वीरनरेन्द्र**-महामात्य वसन्तपाल ।

जातः कुम्भी न स परिवृढः किञ्चिदुद्गीर्णतार-
श्चक्रे सम्प्रत्यहितवदनैर्नीलनालीकलीला ।
तत्संरम्भाद् विरम रमतामुत्सवोच्छ्रीयमाण-
प्रेङ्खत्पट्टांशुकमुदयिभिः पत्तनं पौरलोकैः ॥ ६५ ॥

अपि च—

उल्लोचाः प्रसरन्तु सन्मणिश्रेणीपरिष्वङ्गिणः
खेलन्तु प्रतिचन्द्रशालमुदितश्रीकाः पताकालताः ।
सिच्यन्तामभितश्चतुःसर(र)जलैरुद्दामचैश्चत्वराः
सङ्गीतोर्मिभिरुल्लसन्तु सुभगाः शृङ्गाटकश्रेणयः ॥ ६६ ॥

किञ्च—भोः स्वामिन् ! अपूर्वमेतत् ते सम्परायवैदग्ध्यम् । तथाहि—

अग्रेऽग्रे पदसङ्गतिर्विजयिनी सा काचिदोजोगुण-
प्रौढा सङ्घटनोदपादि कुटिलः शब्दक्रमोऽलङ्कृतः ।
दोषा ये प्रसरन्ति केऽपि परितः सर्वेऽपि ते धिक्कृता-
स्तज्जानामि **वसन्तपाल** ! कवितासख्येन सङ्ख्यं तव ॥ ६७ ॥

(नेपथ्ये)

**वस्तुपालः**—हंहो बन्दिपुरन्दर ! किं मामलीकसम्भावनया लज्जाम्बुधौ मज्जयसि ? । ननु स्तुहि **वीरधवल**देवम्, यत्प्रतापतनूनपादः कीलाकणविलसितमेतत् । पश्य—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**पञ्चग्राम**समीकसीमनि कृतं येन प्रचण्डाहव-
व्यापारस्पृहयालुना स्वभुजयोरुज्जागरं तद्यशः ।
तस्यापारपराक्रमैकवसतेः को नाम नामाप्यलं
सोढुं गारुडमन्त्रपद्धतिमिव क्रूरोऽपि काकोदरः ॥ ६८ ॥

अपि च—

समिति तदसेः कालक्रीडाविडम्बनडम्बरा-
दसितभुजगीजाग्रद्दंष्ट्रानिभान्न बिभाय कः ? ।
यदतिमहती **सिंह**क्षोणीपतेरपि वाहिनी
रणमभिमुखीकर्तुं धृत्या न मानसमानशे ॥ ६९ ॥

तदलमनेन । वयमिदानीं गत्वा पौरवृन्दमानन्दयामः । भवद्भिरपि समरभूमिमधिगत्य

ये केचित् पतिताः पराक्रमजुषो, ये केऽपि वा मूर्च्छिताः
पोगण्डत्वमकाण्डचण्डिमरसावेशेन ये वागताः ।
संस्कार-प्रतिकार-संवहनजैस्तेषां प्रकारक्रमैः
किं निष्कारणबन्धुभिर्न सहसा साहाय्यमारभ्यते ? ॥ ७० ॥

**बन्दिराजः**—स्वामिन् ! अनुभवतु भवान् निजभवनभूषणीभूय परितः पौरमहोत्सवाडम्बरम् । एते वयं च भवदाज्ञां सम्पादयामः । ( इति परिक्रामति । )

**मागधाः**—[1]भट्टसेहर ! पिच्छ पिच्छ, विजयसिरिपरिरंभसमुल्लसियरोमंकुरकरंबिअसरीरे णिअमंदिरोअरम्मि सन्निवेट्ठे महाराय**वीरधवल**सचिवसेहरे **वसंतपाले** मुरयझल्लरी मियंगाउज्जवज्जंतपाडगइणच्चंत वारविलासिणी विहसिरकडक्खविक्खेवसरंगभुअंगजणसिंगारविचित्तियाइं मंगलिउवहारसंगहणसमाउलवाणिअयवग्गगग्गयवयणरमणिज्जाइं महुरवेयज्झुणिडंबरमुहलविप्पविंदाइं एदो य्येव इंताइं दीसंति ।

**बन्दिराजः**—(सहर्षम्) नूनमेते नागरिकजनाः प्राप्तमनोरथाः पुरदेवता-

१ भट्टशेखर ! पश्य पश्य, विजयश्रीपरिरम्भसमुल्लसितरोमाङ्कुरकरम्बितशरीरे निजमन्दिरोदरे सन्निविष्टे महाराजवीरधवलसचिवशेखरे वसन्तपाले मुरज-झल्लरी-मृदङ्गातोद्यवाद्यमानपाटगतिनृत्यद्वारविलासिनीविहसितकटाक्षविक्षेपसरङ्गभुजङ्गजनशृङ्गारविचित्रितानि माङ्गलिकोपहारसङ्ग्रहणसमाकुलवाणिजकवर्गगद्गदवचनरमणीयानि मधुरवेदध्वनिडम्बरमुखरविप्रवृन्दानि इत एव आयन्ति दृश्यन्ते ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

**मेकलत्तीरा**मुक्तवर्द्धापनिक्रया पूजयितुमुपक्रमन्ते। तद्यावन्न संमर्दकर्दमे पतामस्तावदेव गत्वा कार्यं सम्पादयामः।

(इति निष्क्रान्ताः)

(ततः प्रविशति यथानिर्दिष्टः पौरलोकः।)

**श्रेष्ठिकः**—(सानन्दम्) दिष्ट्या वर्द्धामहे, प्रसन्ना भगवतीयमस्माकं क्षेत्रदैवतं **दुर्गा**, यदयं **गूर्जरा**धीश्वरस्य **वीरधवलस्य** सचिवशेखरेण **वसंतपालेन शङ्ख**-पराभवो निर्वाहितः। तदेनामर्चयितुमुपस्थितोऽयमानन्दपरवशो नृत्यन्नुन्मदिष्णुरिव पौरलोकः।

**पौरलोकः**—(निरूप्य) अहो! महोत्सवस्य रामणीयकम्?। अत्र हि सर्वतः

उन्मीलन्नीरुपङ्केरुहविहरदलिश्रेणिसब्रह्मचारि-
प्रेङ्खद्दृग्द्राघिमाणं विधुतमनिभृतं मौलिमुन्मूलयन्त्यः।
एताः सान्दोलहाराः श्रवणपरिणमत्कुण्डलास्तालगत्या
नृत्यादौ पाणि-पाद-त्रिकवलनकलाकेलिमासूत्रयन्ति॥ ७१॥

अपि च—

अश्लिष्यन्ति यथा यथा नवनवप्रेमप्रसन्ना दृशो
यूनां हन्त! तथा तथा तरलितभ्रूवल्लरीपल्लवाः।
एताः प्रस्खलदंशुकव्यतिकरव्यक्तस्तनोपत्यका-
भावैर्मांसलयन्ति लोचनकलाभङ्गीः कुरङ्गीदृशः॥ ७२॥

(पुनर्निरूप्य) इयं मसृणमनोहरैरङ्गैरुल्लासयन्ती करणमन्तःकरणं मे कृतार्थयति। तथाहि—

पार्श्वे पुष्पपुटेन पाणियुगलेनालङ्कृतं कुर्वती
वामं वामविलोचनेयमपरं किञ्चिन्नतं तन्वती।
पादेनापि तलप्रसञ्चरतया सज्जेन सङ्गीतनं
नृत्यन्ती वितनोस्तनोति मधुर-स्निग्ध-प्रसन्ना दृशः॥ ७३॥

(पुनरन्यतो निरूप्य) इतश्च मामुत्सवस्तदङ्कितमनोरथानामत्र[ प ]दति चापलं कुलटानाम्। तथाहि—

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

दशां कश्चित् कश्चिल्ललितभुजलीलाविचलितैः
कराघातैः कश्चिन्नखविलिखनैः कश्चिदधिकम् ।
स्पृशन्त्यः सम्बाधे गुरुभिरनभिप्रेक्षितपथे
यथेष्टं चेष्टन्ते स्फुरत्कुचतटाः पश्य कुलटाः ॥ ७४ ॥

तदलममूषामालोकन........कलङ्केन । ( अन्यतोऽवलोक्य ) इदमलौकिकमपरमानन्दसत्रम्, यदियमसीमसौन्दर्यनिर्यासभूरङ्ग-प्रत्यङ्गोऽङ्गवलनविवर्त्तनैर्नर्त्तयति सामाजिकानां मनांसि, तदेनां किञ्चिदभ्यर्थये । ( नर्त्तकीं प्रति ) अयि लासिके ! कैशिकीसञ्जीवनि !

परिहर करणाङ्गहारहेलावलन-विवर्त्तनवन्ति नर्त्तनानि ।
सुमुखि ! सहजयैव रेखया ते परिषदियं ननु हर्षनिस्तरङ्गा ॥ ७५ ॥

**अन्यः**—[1]णं एदं भयवदीए **दुग्गाए** पत्तं **आयग्गणं**, एयं च सव्वं उवत्थियं पूओवयरणं, ता पविसिय अच्चीयदु देवी **एकल्लवीरा**, जेस्सा पसायेण सिरि**वीरधवलो गुज्जराहिव( ? वो ) वसंतवाल-तेअवाले**हिं सचिवेहिं समं रज्जं कुणेइ ।

**विप्राः**—कुरुतां कुरुताम् । तथाहि—

सार्द्धं **जैतल्लदेव्या** सकलमपि कलाकोशमुल्लासयन्त्या
राज्यं निष्कण्टकोर्वीभरमुपनतया, **वस्तुपालेन** साकम् ।
**तेजःपालेन** च श्रीकरणपरिणतप्रातिभेनानुयातो
धत्तां श्री**वीरशक्रः** क्षितिवलयमयं यावदम्भोजभानुः ॥ ७६ ॥

( इति सर्वे नानाविधोपचारैः प्रविश्य भगवतीपूजां नाटयन्ति । )

**एकः**—अहो ! वैभवं पूजायाः ।

अगुरुपरिमलः क्वचिद् गरीयान् क्वचिदपि मोदकराशिरुत्थितोऽयम् ।
क्वचन कुसुमसौरभैरुदारैः मृगमद-चन्दनबन्धुभिर्विबुद्धम् ॥ ७७ ॥

---

१ खलु एतद् भगवत्या दुर्गायाः प्राप्तमायतनम्, एतच्च सर्वमुपस्थितं पूजोपकरणम्, तत् प्रविश्य अर्च्यतां देवी एकल्लवीरा, यस्याः प्रसादेन श्रीवीरधवलो गूर्जराधिपः वसन्तपाल-तेजःपालाभ्यां सचिवाभ्यां समं राज्यं करोति । —छाया ।

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

( सर्वे पूजयित्वा स्तुवन्ति )

भद्रे भारति ! भावनीयविभवे ! भव्ये ! भवप्रेयसि
भ्रान्तिभ्रंशपरे भवाऽर्त्तिशमनि ! भ्रूभङ्गभीमाऽऽहवे ।
भक्तिप्रह्वभयापहारिणि ! भव भ्रश्यद्दुराऽऽविर्भव-
द्वारे भोगविभूतिदायिनि भुवे भासां भवत्यै नमः ॥ ७८ ॥

इदं चाभ्यर्थयामहे——

यथाऽधुना देवि ! कृतप्रसादा श्रीवस्तुपालस्य जयोत्सवेन ।
तथा तथाऽऽपत्सु पुनः पुनर्नस्त्रातुं कृपामर्हसि कर्त्तुमार्ये ! ॥ ७९ ॥

( आकाशे ध्वनिः )

( सर्वे सविस्मयमाकर्णयन्ति । )

भो भोः स्तम्भतीर्थसम्बन्धिनः पौरजानपदाः !

श्रीवीरशाकसचिवेन वसन्तपालेनाऽऽराधितैव भवतः प्रतिपालयामि ।
सम्प्रत्यनेन तु महोत्सवडम्बरेण तृप्ताऽन्यदप्यभिमतं भवतां तनोमि ॥ ८० ॥

**सर्वे**——( श्रुत्वा सहर्षम् ) अहो ! महानभ्युदयः, यद् भगवती प्रसन्ना अस्माना-काशसरस्वत्याऽनुगृह्णाति, तद् भोः पौरजनप्रधानश्रेष्ठिन् ! प्रार्थ्यतामभिमतम् ।

**श्रेष्ठिकः**——( अञ्जलिं बद्ध्वा ) अयि भगवति ! जगत्त्रयैकजननि ! यद्यपि महाराजवीरधवलसचिवस्य वस्तुपालस्य शङ्खपराभवमहोत्सवं घटयता तव करुणालवेन समस्तमपि समीहितमस्माकमापादितम् । तथापीदमस्तु——

राजानः सत्कवीनाममृतमिव वचोमञ्जरीमाद्रियन्तां
सन्तापः पापकर्णेजपकपटकृतो माऽस्तु विद्वज्जनस्य ।
आ चन्द्रार्कं क्रियन्तां हरिहरसुकवेः सूक्तिसीमन्तिनीभिः
साकूतं लास्यलीलाः सहृदयहृदयोत्तुङ्गरङ्गस्थलीषु ॥ ८१ ॥

( आकाशे )

एवमस्तु । ( इति सर्वे निष्क्रान्ताः )

**कविसार्वभौममहोपाध्यायश्रीहरिहरकृतिः शङ्खपराभवो नाम व्यायोगः ।**

---

P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust

# पद्यसूची


| | पृ. | श्लो. |
|---|---|---|
| अगुरुपरिमलः क्वचिद् | २२ | ७७ |
| अग्रेऽग्रे पदसङ्गतिर्विजयिनां | १९ | ६७ |
| अणुण्णयक्खगमणुत्तअण- | ८ | २१ |
| अन्तः कौटिल्यमुल्लासयसि | ७ | १८ |
| अमी प्रवरपत्तयः | ७ | १९ |
| अयमुदयगिरीन्द्रात् | ९ | २६ |
| अशितमसितं पूर्वम् | १० | २९ |
| अश्लिष्यन्ति यथा यथा | २१ | ७२ |
| अस्मिन्नालोक्यमाने प्रसरति | ११ | ३३ |
| अस्मिन् नासीरसेना- | ९ | २५ |
| आयातोऽसि किमर्थमाहव- | १९ | ६४ |
| आरूढास्तुरगेषु ये | १३ | ४१ |
| आविष्कृतानि रणकेलिकलासु | १५ | ५० |
| उन्मीलन्नीलपङ्केरुह- | २१ | ७१ |
| उपरि परिपतन्तमन्तकश्रीः | १३ | ४३ |
| उल्लोचाः प्रसरन्तु सद्मसुमणि- | १९ | ६६ |
| एकः शङ्खो हत इह | १४ | ४४ |
| एकेनैव दिनेन यः | ३ | ६ |
| एकोऽनेकान् प्रवीरान् | १६ | ५५ |
| एतल्लुण्टितुमागतोऽसि | ५ | १२ |
| कति न भुवनपालाः | १७ | ५९ |
| कर्तेति कीर्त्तिमन्य[स्य] | १ | १ |
| किमपकृतमतस्त्वया- | १५ | ५१ |
| को मे पूरयिताऽस्ति | ६ | १६ |
| गोडचूडामणेरस्य भारद्वाज- | ३ | ७ |
| छिन्नो नूनमनेककृत्रिम- | १७ | ५६ |
| जातः कुम्भी न सः | १९ | ६५ |
| जीयादम्बुजिनीपतिः सः | १ | २ |
| तावद् वीरा धीराः | १८ | ६१ |
| तूणादाकृष्य बाणानथ | ७ | २० |
| तेजो मूर्त्तमुदेति | १० | २८ |
| दिग्भित्तीः समतां नयन्निव | १० | २७ |
| दिव्वम्मि दुव्विणीए होइ | १४ | ४६ |
| दृशा कश्चित् कश्चित् | २२ | ७४ |
| दृष्टास्तेऽन्ये समिति | ५ | १३ |
| देशोऽयं पूर्वजानां स्फुरति | १५ | ४९ |
| द्वारं तोरणमालिका- | २ | ४ |
| नियोगी त्वं विद्वानसि | ६ | १५ |
| पञ्चग्रामसमीकसीमनि | २० | ६८ |
| परिहर करणाङ्गहार- | २२ | ७५ |
| पार्श्वे पुष्पपुटेन | २१ | ७३ |
| पृष्ठे कृत्वा स्तम्भतीर्थम् | ४ | ९ |
| प्रकटमकपटानां वीरसेनाभटानाम् | १० | ३१ |
| प्रतिभटघटामावासस्य | ८ | २३ |
| प्रसमरकरजालव्यस्त- | १० | ३० |
| प्राप्ते प्रत्यर्थिनां सैन्ये | ४ | १० |
| बहिरिह विरह[हर]न्ताम् | ४ | ८ |
| भद्रे भारति ! भावनीयविभवे ! | २३ | ७८ |
| भुयबलदलियाए अज्ज | ६ | १७ |
| भ्राता सिंहभटस्य यः | २ | ५ |
| मदयति गगनश्रीर्द्विज- | १ | ३ |
| मध्येपत्तनमुद्यमं वितनुते | ११ | ३२ |
| मन्त्रीन्द्रेणाद्य यावत् | १२ | ३६ |
| महाराष्ट्रक्षोणीपति- | १४ | ४५ |
| मार्गान् यः परितोऽवरुध्य | १२ | ३९ |
| मिथः प्रकटसम्भ्रम- | १८ | ६२ |
| मूर्त्तो वीररसः प्रसन्नमहिमा | ५ | ११ |
| यत्राऽऽरोप्य भुजङ्गपुङ्गवः | १२ | ३८ |
| यथाऽधुना देवि ! | २३ | ७९ |
| यदतुलबलावष्टम्भेन | १७ | ५७ |
| यदयमुदितः संवर्त्ताम्भोधर- | ८ | २२ |
| यः शैशवे विनयवैरिणि | १३ | ४० |


P. P. Ac. Gunratnasuri M.S.　　Jin Gun Aaradhak Trust

| | पृ. | श्लो. |
|---|---|---|
| यः सिन्धुराजतनयः | १३ | ४२ |
| ये केचित् पतिताः | २० | ७० |
| ये त्वां मत्करवालकाल- | १६ | ५४ |
| येन सङ्ग्रामसिंहोऽयम् | १८ | ६३ |
| येन स्वस्मिन् नमसि | १२ | ३७ |
| येनाकारि स सिंहणक्षितिपति- | ५ | १४ |
| येनाऽऽनीयत वर्गपाटक- | १८ | ६० |
| यौ सामन्तौ शौर्यनिष्ठौ | १५ | ५२ |
| रणभुवि परिहासं यत् | १४ | ४७ |
| राजानः सत्कवीनाममृतमिव | २३ | ८१ |
| विभिन्दाना मंक्षु शिबिरथ | १२ | ३५ |
| शङ्खनाम्ना निहत्याजौ | १७ | ५८ |
| श्रीवीरशक्रसचिवेन | २३ | ८० |
| सन्नद्धासु विरोधिसैन्य- | ११ | ३४ |
| सल्लामसहपरिहास- | १६ | ५३ |
| समिति तरलैः कालक्रीडा- | २० | ६९ |
| सव्वत्तो पविसंति जे वि | ९ | २४ |
| सार्द्धं जैतल्लदेव्या सकलमपि | २२ | ७६ |
| सैन्यं सिंहणपार्थिवस्य | १५ | ४८ |


P. P. Ac. Gunratnasuri M.S. Jin Gun Aaradhak Trust